# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा-शास्त्री-३** | **प्रश्नपत्रम् – ६** | **गुणाः – ७०** |
| **विषयः – पुराणेतिहासः** | **सत्रम्- ६ षष्ठम्** | **समयः- ०८:०० तः ११:००** |
| **दिनाङ्कः – ०१/०४/२०२०** | **सन्दर्भग्रन्थः – महाभारते शान्तिपर्वणि आपद्धर्मपर्व** | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्नः १ निम्नश्लोकेषु द्वयोः ससन्दर्भव्याख्यां कुरुत।** १०

१ बाह्यश्चेद् विजिगीषु स्यात् धर्मार्थः कुशलः शुचिः।
जवेन सन्धिं कुर्वीत पूर्वभुक्तान् विमोचयेत्।।

२ न धनं यज्ञशीलानां हार्यं देवस्वमेव च ।
दस्यूनां निष्क्रियाणां च क्षत्रियो हर्तुमर्हति।।

३ अमित्रो मित्रतां याति मित्रं चापि प्रदुष्यति।
सामर्थ्ययोगात् कार्याणां अनित्या वै सदा गतिः।।

**प्रश्नः २ निम्नयोः एकस्मिन् विषये निबन्धो लेख्यः।** १०

१ पूजनीब्रह्मदत्तयोः कथा।

अथवा

२ कूटनीतेरुपदेशः।

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ निम्नेषु श्लोकेषु द्वयोः ससन्दर्भः व्याख्या कार्या।** १०

१ न सा स्त्री ह्यभिमन्तव्या यस्यां भर्ता न तुष्यति।
तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वदेवताः।।

२ अरावप्युचितं कार्यमातिथ्यं गृहमागते।
छेत्तुमप्यागते छायां नोपसंहरते द्रुमः।।

३ धर्मार्थकामकालेषु भार्या पुंसः सहायिनी।
विदेशगमने चास्य सैव विश्वासकारिका।।

**प्रश्नः ४ निम्नविषयो एकस्मिन् विषये निबन्धं लिखत।** १०

१ कपोतव्याधयोः आख्यानम्।

२ ब्राह्मणबटोः पुनर्जीवनाख्यानम्।

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ निम्नश्लोकेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१ करोति पापं योऽज्ञानान्नात्मनो वेत्ति च क्षयम्।
प्रद्वेष्टिसाधुवृत्तांश्च स लोकस्यैति वाच्यताम्।।

२ सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम्।
सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठितम्।।

३ अक्षमायाः क्षमायाश्च प्रियाणीहाप्रियाणी च।
क्षमते सम्मतः साधु साध्वाप्नोति च सत्यवाक्।।

**प्रश्नः ६ निम्नविषयेषु एकस्मिन् विषये विस्तरेण लिखत।** १०

१ विविधपापम् एवं प्रायश्चित्तवर्णनम्।

२ कृतघ्नगौतमकथाप्रसङ्गः।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ निम्नप्रश्नेषु दशप्रश्नानाम् उत्तराणि लिखत।** १०

१ बकराज्ञः नाम किमासीत्?

२ अर्थसिद्धिः कतिविधा?

३ राजधर्मा कस्य पुत्र आसीत्?

४ समस्तानर्थानां कारणं किम्?

५ शाल्मलिवृक्षाय केन उपदेशः प्रदत्तः?

६ मृतबालकः केन संजीवनः कृतः?

७ जनमेजयद्वारा केन यज्ञः कारितः?

८ इन्द्रोतः को आसीत्?

९ कपोतः किमर्थं अग्नौ पतितः?

१० आपत्काले राजा कान् सेवेत्?

११ चाण्डालाय केन उपदेशः प्रदत्तः?

१२ सौबीरनरेशस्य नाम किमासीत्?

१३ कणिकेन कस्मै उपदेशः प्रदत्तः?

१४ कस्मिन् विषये उपदिष्टः कणिकः?

१५ महाभारेत कति पर्वाणि?

*************************